[illegible]यनमः ॥ अथ नारायणोपनिषत् ॥

[illegible]ज्ञात कार्यमखिलं यद्बोधा[illegible]भवम् ॥

१ [illegible]पा नारायणाख्यं तं कलये स्वात्ममात्रतः ॥१॥ १

ओं सहनाववत्विति शांतिः ॥ ओं अंभस्य
पारे भुवनस्य मध्ये नाकस्य पृष्ठे महतो म
हीयान् ॥ शुक्रेण ज्योतींषि समनुप्रविष्टः
प्रजापतिश्चरति गर्भे अंतः यस्मिन्निदं सं
च विचैति सर्वं यस्मिन्देवा अधिविश्वे निषेदुः
तदेव भूतं तदु भव्यमा इदं तदक्षरे परमे व्यो
मन् ॥ येनावृतं खं च दिवं महीं च येनादित्य
स्तपति तेजसा भ्राजसा च ॥ यमंतः समुद्रे

कवयो वयन्ति पद ... परमे प्रजाः॥

प्रसूता जगतः प्रसूती तोयेन जीवान् व्यचस

र्ज भूम्याम्॥ यदोषधीभि पुरुषान्पशूꣳश्च

२

विवेश भूतानि चराचराणि॥ अतः परं नान्य

दणीयसꣳहि परात्परं यन्महतो महान्तम्॥

यदेकमव्यक्तमनन्तरूपं विश्वं पुराणं तमसः

परस्तात्॥१॥ तदेवर्तं तदु सत्यमाहुस्तदेव

ब्रह्मपरमं कवीनाम्॥ इष्टापूर्तं बहुधा जातं

जायमानं विश्वं बिभर्ति भुवनस्य नाभिः॥

तदेवाग्निस्तद्वायुस्तत्सूर्यस्तदु चन्द्रमाः॥

तदेव शुक्रममृतं तद्ब्रह्म तदापः स प्रजापतिः

सर्वे निमेषा जज्ञिरे विद्युतः पुरुषादधि ॥ कला
मुहूर्ताः काष्ठाश्चाहोरात्राश्च सर्वशः ॥ अर्धमा
३ सा मासा ऋतवः संवत्सरश्च कल्पन्ताम् ॥ स आपः ३
प्रदुघे उभे इमे अन्तरिक्षमथो सुवः ॥ नैनमू
र्ध्वं न तिर्यञ्चं न मध्ये परिजग्रभत् ॥ न तस्येशे
कश्चन तस्य नाम महद्यशः ॥२॥ न संदृशे तिष्ठति
रूपमस्य न चक्षुषा पश्यति कश्चनैनम् ॥
हृदा मनीषा मनसाभिक्लृप्तो य एनं विदुरमृता
स्ते भवन्ति ॥ अद्भ्यः संभूतो हिरण्यगर्भ इत्य
ष्टौ ॥ एष हि देवः प्रदिशोऽनु सर्वाः पूर्वो हि
जातः स उ गर्भे अन्तः ॥ स विजायमानः स

जनित्वमाराः कन्यञ्जुखास्लिक विविश्वतो

मुरवः ।। विश्वतश्चक्षुरुत विश्वतो मुरवो वि

४ श्वतोहस्त उत विश्वतस्पात् ।। संबाहुभ्यां न ४

मति संपतत्रैर्द्यावा पृथिवी जनयन् देव एकः

।। वेनस्तत्पश्यन् विश्वा भुवनानि विद्वान् यत्र वि

श्वं भवत्येकनीलम् ।। यस्मिन्निदं संच विचैकं

स ओतः प्रोतश्च विभुः प्रजासु ।। प्रतद्वोचे अमृतं

नु विद्वान् गन्धर्वो नाम निहितं गुहासु ।।३।।

त्रीणि पदा निहिता गुहासु यस्तद्वेद सपितुःपि

तासत् ।। सनो बन्धुर्जनिता स विधाता धामानि

वेद भुवनानि विश्वा ।। यत्र देवा अमृतमान

प्रानास्ततीये धामान्यध्यैरयन्त॥ परिद्यावापृ
थिवी यन्ति सद्यः परि लोकान्परि दिशः प
५ रिस्वः॥ ऋतस्य तंतुं विततं विचृत्य तदपश्यत् ५
तदभवत्प्रजासु॥ परीत्य लोकान्परीत्य भू
तानि परीत्य सर्वाः प्रदिशो दिशश्च॥ प्रजा
पतिः प्रथमजा ऋतस्यात्मनात्मानमभिसं
बभूव॥ सदसस्पतिमद्भुतं प्रियमिन्द्रस्य
काम्यम्॥ सनिं मेधामयासिषम्॥ उद्दीप्य
६ स्व जातवेदोपघ्नं निर्ऋतिं मम॥ ४॥ पशूंश्च
मह्यमावह जीवनं च दिशो दिश॥ मा नो
हिंसीज्जातवेदो गामश्वं पुरुषं जगत्॥

गलिभ्रदय आगहि द्वि वामायगिरवानय ॥
पुरुषस्य विद्महे सहस्राक्षस्य महादेवस्य
६ धीमहि ॥ तन्नो रुद्रः प्रचोदयात् ॥ तत्पुरुषा ६
महादेवाय
यविद्महे वक्रतुण्डाय धीमहि ॥ तन्नो रुद्रः
प्रचोदयात् ॥ तत्पुरुषायविद्महे वक्रतुण्डा
य धीमहि ॥ तन्नो दन्तिः प्रचोदयात् ॥ तत्पुरु
षाय विद्महे चक्रतुण्डाय धीमहि ॥ तन्नो नन्दिः
प्रचोदयात् ॥ तत्पुरुषायविद्महे महासेनाय
धीमहि ॥ तन्नः षण्मुखः प्रचोदयात् ॥ तत्पु
रुषायविद्महे सुवर्णपक्षाय धीमहि ॥ तन्नो
गरुडः प्रचोदयात् ॥ वेदात्मनाय विद्महे हिर

ण्यगर्भाय धीमहि॥ तन्नो ब्रह्म प्रचोदयात्॥ ॥
नारायणाय विद्महे वासुदेवाय धीमहि॥ तन्नो
७ विष्णुः प्रचोदयात्॥ वज्रनखाय विद्महे तीक्ष्ण ७
दंष्ट्राय धीमहि॥ ६॥ तन्नो नारसिंह प्रचोद
यात्॥ भास्कराय विद्महे महद्युतिकराय धी
महि॥ तन्नो आदित्यः प्रचोदयात्॥ वैश्वानरा
य विद्महे लालीलाय धीमहि॥ तन्नो अग्निः प्र
चोदयात्॥ कात्यायनाय विद्महे कन्यकुमारि
धीमहि॥ तन्नो दुर्गिः प्रचोदयात्॥ सहस्रपर
मादेवी शतमूला शताङ्कुरा॥ सर्वं हरतु मे
पापं दूर्वा दुःस्वप्ननाशिनी॥ काण्डात् काण्डात् प्ररो

हन्तौ परुषः परुषः परि ॥ एवानो दूर्वे प्रतनु स
हस्रेण शतेन च ॥ या शतेन प्रतनोषि सहस्रेण
विरोहसि ॥ तस्यास्ते देवीष्टके विधेम हविषा ८
वयम् ॥ अश्वक्रान्ते रथक्रान्ते विष्णुक्रान्ते वसु
धरे ॥ शिरसा धारयिष्यामि रक्षस्व मां पदे पदे ॥
भूमिर्धेनुर्धरणी लोकधारिणी ॥ उद्धृतासि
वराहेण कृष्णेन शतबाहुना ॥ मृत्तिके हन मे
पापं यन्मया दुष्कृतं कृतम् ॥ मृत्तिके ब्रह्मदत्तासि
काश्यपेनाभिमन्त्रिता ॥ मृत्तिके देहि मे पुष्टिं
त्वयि सर्वं प्रतिष्ठितम् ॥ ८ ॥ मृत्तिके प्रतिष्ठिते
सर्वं तन्मे निर्णुद मृत्तिके ॥ तया हतेन पापेन ग

अभिप्रमां गतिम् ॥ यतइन्द्र भयामहे ततोनो
अभयंकृधि ॥ मघवंछग्धि तव तन्न उतये
विद्विषोविमृधोजहि ॥ स्वस्तिदाविशस्पति
र्वृत्रहा विमृधोवशी ॥ वृषेन्द्रः पुरएतुनः स्व
स्तिदा अभयंकरः ॥ स्वस्तिनइन्द्रो वृद्धश्रवाः स्व
स्तिनः पूषाविश्ववेदाः स्वस्तिनस्तार्क्ष्यो अरिष्ट
नेमिः स्वस्तिनो बृहस्पतिर्दधातु ॥ आपान्तम
न्युस्तृपलप्रभर्मा धुनिः शिमीवां छरुमां ऋ
जीषी ॥ सोमो विश्वान्यतसा वनानिनार्वागिन्द्रं
प्रतिमानानिदेभुः ॥ ९ ॥ ब्रह्मजज्ञानं प्रथमं पु
रस्ताद्विसीमतः सुरुचोवेन आवः ॥ सबुध्न्या

उपजा अस्यविकाः सन्तु [illegible] जिनः॥

स्योनापथिवि भवान्क्षरानिवेशनी॥ यच्छानः

१० शर्मसप्रथाः॥ गन्धद्वारां दुराधर्षां नित्यपुष्टां १०

करीषिणीम्॥ ईश्वरीं सर्वभूतानां तामिहो

पह्वये श्रियम्॥ श्रीर्मे भजतु॥ अलक्ष्मीर्मे नश्यतु

विष्णुमुखा वै देवाश्छन्दोभिरिमाँल्लोकानन

पजय्यमभ्यजयन्॥ महाँ इन्द्रो वज्रबाहुः षोड

शी शर्म यच्छतु॥१०॥ स्वस्ति नो मघवा करोतु

हन्तु पाप्मानं योऽस्मान्द्वेष्टि॥ सोमानं स्वरणं कृ

णुहि ब्रह्मणस्पते॥ कक्षीवन्तं य औशिजम्॥

शरीरं यज्ञशमलं कुसीदं तस्मिन्त्सीदतु योऽ

स्मान्द्वेष्टि ॥ चरणं पवित्रं विततं पुराणं येन पूत

स्तरति दुष्कृतानि ॥ तेन पवित्रेण शुद्धेन पूता

११ अति पाप्मानमरातिं तरेम ॥ सजोषा इन्द्र सग ११

णो मरुद्भिः सोमं पिब वृत्रहञ्छूर विद्वान् ॥ ज

हि शत्रूँ२ रप मृधो नुदस्वाथाभयं कृणुहि

विश्वतो नः ॥ सुमित्रा न आप ओषधयः सन्तु

दुर्मित्रास्तस्मै भूयासुर्योऽस्मान्द्वेष्टि यं च वयं द्वि

ष्मः ॥ आपो हि ष्ठा मयोभुवस्ता न ऊर्जे दधातन ॥

महे रणाय चक्षसे ॥ ११ ॥ यो वः शिवतमो रस

स्तस्य भाजयतेह नः ॥ उशतीरिव मातरः ॥

तस्मा अरङ्गमाम वो यस्य क्षयाय जिन्वथ ॥

आपो जनयथा च नः ॥ हिरण्यशृङ्गं वरुणं प्रपद्ये
तीर्थं मे देहि याचितः ॥ यन्मया भुक्तमसाधूनां
१२ पापेभ्यश्च प्रतिग्रहः ॥ यन्मे मनसा वाचा कर्म १२
णा वा दुष्कृतं कृतम् ॥ तन्न इन्द्रो वरुणो बृहस्प
तिः सविता च पुनन्तु पुनः पुनः ॥ नमोऽग्नयेऽप्सु
मते नम इन्द्राय नमो वरुणाय नमो वारुण्यै न
नमोऽद्भ्यः ॥१२॥ यदपां क्रूरं यदमेध्यं यद
शान्तं तदपगच्छतात् ॥ अत्याशनादतीपाना
द्यच्च उग्रात्प्रतिग्रहात् ॥ तन्नो वरुणो राजा पा
णिना ह्यवमर्शतु ॥ सोऽहमपापो विरजो नि
र्मुक्तो मुक्तकिल्बिषः ॥ नाकस्य पृष्ठमारुह्य

गं श्रेष्ठं सप्तलोकानाम् ॥ यश्चाप्सु वरुणः सपु
नात्वघमर्षणः ॥ इमं मे गङ्गे यमुने सरस्वति सु
१२ तुद्रि स्तोमं ५ सचता परुष्ण्या ॥ असिक्न्या १२
मरुद्वृधे वितस्तयार्जीकीये शृणुह्या सुषोमया ॥
ऋतं च सत्यं चाभीद्धात्तपसोऽध्यजायत ॥ ततो
रात्रिरजायत ततः समुद्रो अर्णवः ॥१३॥ समुद्रा
दर्णवादधि संवत्सरो अजायत ॥ अहोरात्रा
णि विदधद्विश्वस्य मिषतो वशी ॥ सूर्याचं
द्रमसौ धाता यथापूर्वमकल्पयत् ॥ दिवं
च पृथिवीं चान्तरिक्षमथो सुवः ॥ यत्पृथिव्यां
रजस्वमान्तरिक्षे विरोदसी ॥ इमांस्तदापो वे

...राः पुनात्वघमर्षणः ॥ पुनन्तु वसवः पुनातु
वरुणः पुनात्वघमर्षणः ॥ एष भूतस्य मध्ये भु
वनस्य गोप्ता ॥ एष पुण्यकृतां लोकानेष मृत्यो
र्हिरण्मयम् ॥ द्यावापृथिव्योर्हिरण्मयं संश्रि
तं सुवः ॥ १४ ॥ स नः सुवः संशिशाधि ॥ आ
र्द्रं ज्वलति ज्योतिरहमस्मि ॥ अहमस्मि ब्रह्मा
हमस्मि ॥ अहमेवाहं मां जुहोमि स्वाहा ॥ अ
कार्यकार्यवकीर्णी स्तेनो भ्रूणहा गुरुत
ल्पगः ॥ वरुणोऽपामघमर्षणस्तस्मात्पापा
त्प्रमुच्यते रजोभूमिस्त्वमां रोदयस्व प्रवद
न्ति धीराः ॥ आक्रान्त्समुद्रः प्रथमे विधर्म

नजयन्प्रजा भुवनस्य राजा ॥ व्व मा पवित्रे अध्ये
नो अव्ये व्व हत्सोमो वावधे सुवानइन्दुः ॥ १५ ॥
१६ परस्ता घप्रो गुहासु ममचक्रनुग्गा यचीमहिनो १५
क्षाद ९ क्षाय चीमहि पदि प्रतिष्ठितं देमुपक्ष
नुदधा तना ध्यो ऽ र्णवः सुवो राजैकं च ॥ १ ॥
रुद्रो रुद्रश्च दंतिश्च नन्दिः षण्मुख एव च ॥
गरुडो ब्रह्मा विष्णुश्च नारसिंह स्तथैव च ॥
आदित्यो ऽग्निश्च दुर्गिश्च क्रमेण द्वादशाभ्भासि ॥
ममवचमसु वेनाव भावे कात्यायनाय ॥
जातवेदसे सुनवाम सोममरातियतोनिदहा
तिवेदः ॥ सनः पर्षदति दुर्गाणि विश्वानावेव

सिंधुं दुरितात्यग्निः॥ तामग्निवर्णां तपसा ज्व
लन्तीं वैरोचनीं कर्मफलेषु जुष्टाम्॥ दुर्गां दे
१६ वीं शरणमहं प्रपद्ये सुतरसि तरसे नमः॥ १६
अग्ने त्वं पारया नव्यो अस्मान्स्वस्तिभिरति दु
र्गाणि विश्वा॥ पूश्च पृथ्वी बहुला न उर्वी भवा
तोकाय तनयाय शंयोः॥ विश्वानि नो दुर्गहा
जातवेदः सिंधुं न नावा दुरितातिपर्षि॥ अग्ने
अत्रिवन्मनसा गृणानोऽस्माकं बोध्यविता
तनूनाम्॥ पृतनाजितं सहमानमुग्रमग्निं
हुवेम परमात्सधस्थात्॥ स नः पर्षदति
दुर्गाणि विश्वा क्षामदेवो अति दुरितात्यग्निः॥

प्रत्नो मिक मीड्यो अध्वरेषु सनाच्च होता नव्य

श्च सत्सि।। स्वां चाग्ने तनुवं पिप्रयस्वास्मभ्यं

१२ च सौभगमायजस्व।। जो भिर्जु षम पुजो निगि १२

कं तवेद्र।। निक्षारनु संचरेम।। नाकस्य पृष्ठ

मभि संवसानो वैष्णवीं लोक इह मादयन्ताम्।।

अग्निक्ष्व वा तृचं।। भूरग्नये पृथिव्यै स्वा

हा भुवो ऽग्नं वायवे ऽन्तरिक्षाय स्वाहा सुवर

नमादित्याय दिवे स्वाहा भूर्भुवः सुवश्चंद्र

मसे दिग्भ्यः स्वाहा नमो देवेभ्यः स्वधा पितृभ्यो

भूर्भुवः सुवरग्न ओम्।।३।। भूरग्नये पृथिव्यै

स्वाहा भुवो वायवे ऽन्तरिक्षाय स्वाहा सुवरा

दित्याय दिवे स्वाहा। भूर्भुवः सुवश्चन्द्रमसे दिग्भ्यः
स्वाहा नमो देवेभ्यः स्वधा पितृभ्यो भूर्भुवः सुव
रग्न ओम् ॥ ४ ॥ भूरग्नये च पृथिव्यै च महते च १८
स्वाहा भुवो वायवे चान्तरिक्षाय च महते च स्वाहा
सुवरादित्याय च दिवे च महते च स्वाहा भूर्भुवः
सुवश्चन्द्रमसे च नक्षत्रेभ्यश्च दिग्भ्यश्च महते
च स्वाहा नमो देवेभ्यः स्वधा पितृभ्यो भूर्भुवः
सुवर्महरोम् ॥ ५ ॥ पाहि नो अग्न एनसे स्वाहा
पाहि नो विश्ववेदसे स्वाहा ॥ यज्ञं पाहि वि
भावसो स्वाहा ॥ सर्वं पाहि शतक्रतो स्वाहा
॥ ६ ॥ पाहि नो अग्न एकया ॥ पाह्युत द्वितीयया ॥

१९

पाह्यूर्जं तृतीयया ॥ पाहि गीर्भिश्चतसृभिर्व
सो स्वाहा ॥ ७ ॥ यश्छन्दसामृषभो विश्वरूप
श्छन्दोभ्यश्छन्दांस्याविवेश ॥ सचां शि
क्यः पुरो वाचोपनिषदिन्द्रो ज्येष्ठ इन्द्रियाय ऋ
षिभ्यो नमो देवेभ्यः स्वधा पितृभ्यो भूर्भुवः सु
वश्छन्द ओम् ॥ ८ ॥ नमो ब्रह्मणे धारणं मे
अस्त्वनिराकरणं धारयिता भूयासं कर्णयोः
श्रुतं मा च्योढ्वं ममामुष्य ओम् ॥ ९ ॥ ऋतं तपः
सत्यं तपः श्रुतं तपः शान्तं तपो दमस्तपः श
मस्तपो दानं तपो यज्ञं तपो भूर्भुवः सुवर्ब्र
ह्मैतदुपास्यैतत्तपः ॥ १० ॥ यथा वृक्षस्य संपु

१९

८

क्षितस्य दूराद्रुध्यो वा तेनं पुण्यस्य कर्मणो दूरा
द्रुध्यो वाति पश्चात्सिचारां कर्तेवि हितामव
२० क्रामेयश्चुनेपु नेहवा विक्रुपिपूयामि कर्तं पति २०
ष्यामीत्येवममतादात्मानं जुगुप्सेत॥११॥
अरोणरसौ पान्महतो महीपानाम गुहायां निही
तोऽस्य जन्तोः॥ तमक्रतुं पश्यति वीतशोको
धातुः प्रसादान्महिमानमीशम्॥ सप्तप्राणाः प्र
भवन्ति तस्मात्सप्तार्चिषः समिधः सप्तजोह्वाः॥
सप्तइमे लोका येषु चरन्ति प्राणागुहाशया नि
हिताः सप्तसप्त॥ अतः समुद्रागिरयश्च सर्वे
ऽस्मात्स्यन्दन्ते सिन्धवः सर्वरूपाः॥ अतश्च वि

२१

ष्ठा ओमचयोरसाक्ष पेनैवभूतस्सिद्धन्पन्न
रात्मा ॥ ब्रह्मादेवानां पदवीः कवीनामृषिर्वि
प्राणां महिषोमृगाणाम् ॥ श्येनोगृध्राणां
स्वधितिर्वनानां सोमः पवित्रमत्येतिरेभन् ॥
अजामेकां लोहितशुक्लकृष्णां बह्वीं प्रजांज
नयन्तीं सरूपाम् ॥ अजो ह्येको जुषमाणो
ऽनुशेते जहात्येनां भुक्तभोगामजोऽन्यः ॥१॥
हंसः शुचिषद्वसुरन्तरिक्षसद्धोता वेदिषद
तिथिर्दुरोणसत् नृषद्वरसदृतसद्व्योमस
दब्जा गोजा ऋतजा अद्रिजा ऋतं बृहत् ॥ घृतं
मिमिक्षिरे घृतमस्य योनिर्घृते श्रितोघृत

२१

मुखस्य चारुम् ॥ अनुष्वधमावह मादयस्व स्वा
हाकृतं वृषभ वक्षि हव्यम् ॥ समुद्रादूर्मिर्म
२२ धुमाँ उदारदुपांशुना सममृतत्वमानट् ॥ २२
घृतस्य नाम गुह्यं यदस्ति जिह्वा देवानाममृ
तस्य नाभिः ॥ वयं नाम प्र ब्रवामा घृतेनास्मिन्य
ज्ञे धारयामा नमोभिः ॥ उप ब्रह्मा शृणवच्छ
स्यमानं चतुःशृङ्गोऽवमीद्गौर एतत् ॥ चत्वारि
शृङ्गा त्रयो अस्य पादा द्वे शीर्षे सप्त हस्तासो अ
स्य ॥ त्रिधा बद्धो वृषभो रोरवीति महो देवो म
र्त्याँ आ विवेश ॥ २ ॥ त्रिधा हितं पणिभिर्गुह्य
मानं गवि देवासो घृतमन्वविन्दन् ॥ इन्द्र एकं

सूर्यशाकं जजान नेनादेकं स्वधयानिवनक्षुः

॥ योदेवानां प्रथमं पुरस्ताद्विश्वाधिपो रुद्रो महर्षिः ॥

२३ हिरण्यगर्भं पश्यति जायमानं स नो देवः शुभया २३

स्मृत्या संयुनक्तु ॥ यस्मात्परं नापरमस्ति किंचिद्य

स्मान्नाणीयो न ज्यायोऽस्ति कश्चित् ॥ वृक्ष इव स्त

ब्धो दिवि तिष्ठत्येकस्तेनेदं पूर्णं पुरुषेण सर्वम् ॥

न कर्मणा न प्रजया धनेन त्यागेनैके अमृतत्व

मानशुः ॥ परेण नाकं निहितं गुहायां विभ्राजदे

तद्यतयो विशन्ति ॥ वेदान्तविज्ञानसुनिश्चितार्थाः

संन्यासयोगाद्यतयः शुद्धसत्त्वाः ॥ ते ब्रह्मलोके तु

परान्तकाले परामृतात्परिमुच्यन्ति सर्वे ॥ दहं

विपापं परमेश्मभूतं यत्पुण्डरीकपुरमध्यसं

स्थम्॥ तत्रापि दहूं गगनं विशोकस्तस्मिन्यदन्त

२४ स्तदुपासितव्यम्॥ यो वेदादौ स्वरः प्रोक्तो वेदान्ते २८

च प्रतिष्ठितः॥ तस्य प्रकृतिलीनस्य यः परः स

महेश्वरः॥३॥ अजोऽन्या आविनेश्रा सर्वेचान्ना

ृच॥१२॥ सहस्रशीर्षं देवं विश्वाक्षं विश्वशं

भुवम्। विश्वं नारायणं देवमक्षरं परमं पदम्॥

विश्वतः परमान्नित्यं विश्वं नारायणं हरिम्॥ वि

श्वमेवेदं पुरुषस्तद्विश्वमुपजीवति॥ पतिं वि

श्वस्यात्मेश्वरं शाश्वतं शिवमच्युतम्॥

नारायणं महाज्ञेयं विश्वात्मानं परायणम्॥

नारायण परोज्योतिरात्मा नारायणः परः ॥ नाराय
ण परंब्रह्मतत्वंनारायणःपरः ॥ नारायणपरोध्या
२५ ता ध्यानंनारायणः परः यच्चकिंचिज्जगत्सर्वं २५
दृश्यते श्रूयतेऽपि वा ॥ अन्तर्वहिश्चतत्सर्वं
व्याप्य नारायणास्थितः ॥ १ ॥ अनन्तमव्ययंक
विं समुद्रेऽन्तं विश्वशंभुवम् ॥ पद्मकोशप्र
तीकाशं हृदयंचाप्यधोमुखम् ॥ अधोनिष्ट्या
वितस्त्यान्ते नाभ्यामुपरि तिष्ठति ॥ ज्वालामाला
कुलंभाति विश्वस्यायतनं महत् ॥ सन्ततंशिला
भिस्तु लम्बत्याकोशसंनिभम् ॥ तस्यान्ते सुषिरं
सूक्ष्मं तस्मिन्सर्वं प्रतिष्ठितम् ॥ तस्यमध्ये महानग्नि

विश्वार्चि विश्वतो मुखः ॥ सोऽग्रभुग्विभजन्ति

ष्ठन्नाहारमजरः कविः ॥ तिर्यगूर्ध्वमधः शायी र

२६ श्मयस्तस्य संतता ॥ संतापयति स्वं देहमापाद

तलमस्तकः ॥ तस्य मध्ये वह्निशिखा अणीयो

र्ध्वा व्यवस्थितः ॥ नीलतोयदमध्यस्था द्विद्युल्ले

खेव भास्वरा ॥ नीवारशूकवत्तन्वी पीता भास्वत्य

णूपमा ॥ तस्याः शिखाया मध्ये परमात्मा व्यवस्थितः

स ब्रह्मा स शिवः स हरिः सेन्द्रः सोऽक्षरः परमः स्व

राट् ॥२॥ अपि वा संततापद्रूव ॥३॥ आदित्यो

वा एष एतन्मण्डलं तपति तत्र ता ऋचस्तदृचां

मण्डलं स ऋचां लोकोऽथ य एष एतस्मिन्

ण्डलेऽर्चिर्दीप्यते तानि सामानि स साम्नां लो
कोऽथ य एष एतस्मिन्मण्डलेऽर्चिषि पुरुष
२१ स्तानि यजूंषि स यजुषां मण्डलं स यजुषां २१
लोकः सैषा त्रय्येव विद्या तपति य एषोऽन्तरा
दित्ये हिरण्मयः पुरुषः ॥१४॥ आदित्यो वै तेज
ओजो बलं यशश्चक्षुः श्रोत्रमात्मा मनो मन्युर्मनु
र्मृत्युः सत्यो मित्रो वायुराकाशः प्राणो लोकपा
लः कः किं कं तत्सत्यममृतममृतो जीवो विश्वः
कतमः स्वयंभु ब्रह्मैतदमृत एष पुरुष एष
भूतानामधिपतिर्ब्रह्मणः सायुज्यं सलोक
तामाप्नोत्येतासामेव देवतानां सायुज्यं सा

विता ५ समानलोकतामाप्नोति यएवं वेद तपु
पनिषत् ॥ १५ ॥ निधनपतये नमः ॥ निधन
२८ पतान्तिकाय नमः ॥ ऊर्ध्वाय नमः ॥ ऊर्ध्वलिङ्गा २८
य नमः ॥ हिरण्याय नमः ॥ हिरण्यलिङ्गाय नमः ॥
सुपर्णाय नमः ॥ सुपर्णलिङ्गाय नमः ॥ दिव्या
य नमः ॥ दिव्यलिङ्गाय नमः ॥ भवाय नमः ॥ भ
वलिङ्गाय नमः ॥ सर्वाय नमः ॥ सर्वलिङ्गाय नमः
शिवाय नमः ॥ शिवलिङ्गाय नमः ॥ ज्वलाय नमः
ज्वललिङ्गाय नमः ॥ आत्माय नमः ॥ आत्मलि
ङ्गाय नमः ॥ परमाय नमः ॥ परमलिङ्गाय नमः ॥
एतत्सोमस्य सूर्यस्य सर्वलिङ्गं ५ +++

स्थापयति परिशोमन्त्रं पविर्जमू ॥१६॥ सद्योजातं
प्रपद्यामि सद्योजाताय वै नमो नमः ॥ भवे भवे
२८ नातिभवे भवस्पमाम् ॥ भवोद्भवाय नमः ॥१७॥ २९
वामदेवाय नमो ज्येष्ठाय नमः श्रेष्ठाय नमो रुद्रा
य नमः ॥ कालाय नमः कलविकरणनमो बल
विकरणाय नमो बलाय नमो बलप्रमथनाय
नमः सर्वभूतदमनाय नमो मनोन्मनाय नमः ॥
१८॥ अघोरेभ्योऽथ घोरेभ्यो घोरघोरतरेभ्यः ॥
सर्वेभ्यः सर्व सर्वेभ्यो नमस्ते अस्तु रुद्ररूपेभ्यः ॥
१९॥ तत्पुरुषाय विद्महे महादेवाय धीमहि ॥
तन्नो रुद्रः प्रचोदयात् ॥२०॥ ईशानः सर्व विद्यानां

मीश्वरः सर्वभूतानां ब्रह्माधिपतिर्ब्रह्मणोऽधिपति
र्ब्रह्मा शिवो मे अस्तु सदाशिवोम् ॥२१॥ नमो हि
३० रण्यबाहवे हिरण्यवर्णाय हिरण्यरूपाय हिरण्य ३०
पतयेऽम्बिकापतय उमापतये पशुपतये नमो नमः २२
ऋतं सत्यं परं ब्रह्म पुरुषं कृष्णपिङ्गलम् ॥ ऊ
र्ध्वरेतं विरूपाक्षं विश्वरूपाय वै नमो नमः ॥२३॥
सर्वो वै रुद्रस्तस्मै रुद्राय नमो अस्तु ॥ पुरुषो वै
रुद्रस्तन्महो नमो नमः ॥ विश्वं भूतं भुवनं चित्रं ब
हुधा जातं जायमानं च यत् ॥ सर्वो ह्येष रुद्रस्तस्मै
रुद्राय नमो अस्तु ॥२४॥ कद्रुद्राय प्रचेतसे मीढुष्ट
माय तव्यसे ॥ वोचेम शंतमं हृदे ॥ सर्वो ह्येष रुद्र

तस्मै रुद्राय अस्तु ॥२५॥ यस्य वैकंकत्यग्निहोत्रहवणी भवति प्रत्येवास्याहुतयस्तिष्ठन्त्यथो प्रतिष्ठित्यै ॥२६॥ कृणुष्व पाज इति पञ्च ॥२७॥ अदितिर्देवा गन्धर्वा मनुष्याः पितरोऽसुरास्तेषां सर्वभूतानां माता मेदिनी महता मही सावित्री गायत्री जगत्युर्वी पृथ्वी बहुला विश्वा भूता कतमा काया सा सत्येत्यमृतेति वसिष्ठः ॥२८॥ आपो वा इदं सर्वं विश्वा भूतान्यापः प्राणा वा आपः पशव आपोऽन्नमापोऽमृतमापः सम्राडापो विराडापः स्वराडापश्छन्दांस्यापो ज्योतींष्यापो यजूंष्यापः सत्यमापः सर्वा देवता आपो भूर्भुवः सुवराप ओम् ॥२९॥ आपः पुनन्तु पृ

३१

थ्वी [illegible] पूता पुन[illegible]माम्॥ पुनंतु ब्रह्मणस्पति

र्ब्रह्मपूता पुनातु माम्॥ यदुच्छिष्टमभोज्यं च यद्वा

३२ दुश्चरितं मम॥ सर्वं पुनंतु मामापोऽसतां च प्रति ३२

ग्रहं स्वाहा॥ ३०॥ अग्निश्च मामन्युश्च मन्युपत

यश्च मन्युकृतेभ्यः॥ पापेभ्यो रक्षंतां यदह्ना पा

पमकार्षं मनसा वाचा हस्ताभ्यां पद्भ्यामुदरेण

शिश्ना॥ अहस्तदवलुम्पतु॥ यत्किंचदुरितंमयि

इदमहं माममृतयोनौ॥ सत्ये ज्योतिषि जुहोमि

३१ स्वाहा॥ ३१॥ सूर्यश्च मामन्युश्च मन्युपतयश्च ३१

मन्युकृतेभ्यः॥ पापेभ्यो रक्षंताम्॥ यद्रात्र्या पा

पमकार्षं मनसा वाचा हस्ताभ्यां पद्भ्यामुदरेण

३३

धीमह्या॥ रात्रिमदन लुप्ततु॥ यत्किंचदुरितंमयि
इदमहं मामम तयोनौ सूर्य्ये ज्योतिषि जुहोमि स्वा
हा॥३२॥ ओमित्येकाक्षरं ब्रह्म॥ अग्निर्देवता ब्रह्म
इत्यार्षम्॥ गायत्रं छन्दं परमात्मं सरूपम्॥ सायुज्यं
विनियोगम्॥३३॥ आयातु वरदा देवी अक्षरं ब्रह्म
संमितम्॥ गायत्री छन्दसां मातेदं ब्रह्म जुषस्वमे॥
यदह्ना कुरुते पापं तदह्ना प्रतिमुच्यते॥ यद्रात्र्या
कुरुते पापं तद्रात्र्या प्रतिमुच्यते॥ सर्ववर्णे महा
देवि सन्ध्याविद्ये सरस्वति॥३४॥ ओजोसि सहोसि
बलमसि भ्राजोसि देवानां धाम नामासि विश्व
मसि विश्वायुः सर्वमसि सर्वायुरभिभूरों गायत्री

सादिजोआव हयाम्सि ...

... मि ... ओ ... वाह ... प्रिय मा वा

हयामि ... धुन्दो निश्वामित्र ऋ षि: स वि

२४ नादेवता ऽ ग्निर्मुखं ब्रह्मा शिरो विष्णुर्हृदयं रुद्रः २४

शिखा पृथिवी योनि: प्राणापान व्यानोदान समाना

स प्राणा श्वेतवर्णा सांख्यायनस गोत्रा गायत्री चतु

र्विंशत्यक्षरा त्रिपदा षट्कुक्षि: पञ्चशीर्षोपनय

ने विनियोग: ॥ ओं भूः ओं भुव: ॥ ओं सुव: ॥ ओं मह: ॥

ओं जन: ॥ ओं तप: ॥ ओं सत्यम् ॥ ओं तत्सवितुर्वरेण्यं

भर्गो देवस्य धीमहि ॥ धियो यो न: प्रचोदयात् ॥

ओमापो ज्योतिर सोऽमृतं ब्रह्म भूर्भुवः सुवरोम् ॥ ३५ ३

उत्तमे शिखरे जाते भूम्यां पर्वत मूर्धनि ॥ ब्राह्मणो

म्योऽभ्यनुज्ञाता गच्छ देवि यथा सुखम् ॥ स्तुतो मया
वरदा वेदमाता प्रचोदयन्ती पवने द्विजाता ॥ आयुः पृ
३५ थिव्यां द्रविणं ब्रह्मवर्चसं मह्यं दत्वा प्रजातुं ब्रह्मलो ३५
कं ॥ ३६ ॥ घृणिः सूर्य आदित्यो न प्रभा वात्यक्षरम् ॥
मधुक्षरन्ति तद्रसम् ॥ सत्यं वै तद्रसमापोज्योती रसो
मृतं ब्रह्म भूर्भुवः सुवरोम् ॥ ३७ ॥ ब्रह्ममेतु माम् ॥
मधुमेतु माम् ॥ ब्रह्ममेव मधुमेतु माम् ॥ यास्ते सो
म प्रजा वत्सोऽभि सो अहम् ॥ दुःष्वप्नहं दुरुष्वह ॥ या
स्ते सोम प्राणांस्तान्जुहोमि ॥ त्रिसुपर्णमयाचितं
ब्राह्मणाय दद्यात् ॥ ब्रह्महत्यां वा एते घ्नन्ति ॥ ये ब्राह्म
णास्त्रिसुपर्णं पठन्ति ॥ ते सोमं प्राप्नुवन्ति ॥ आसह

स्ना त्वाद्धं पुनन्ति ॥३८॥ ओं ब्रह्ममेधया मधुमेधया
ब्रह्ममेव मधुमेधया ॥ अद्या नो देव सवितः प्रजाव
त्सावीः सौभगं ॥ परा दुःष्वप्न्यं सुव ॥ विश्वानि दे
व सवितर्दुरितानि परासुव ॥ यद्भद्रं तन्न आसुव ॥
मधुवाता ऋतायते मधुक्षरन्ति सिन्धवः ॥ माध्वीर्नः
सन्त्वोषधीः ॥ मधुनक्तमुतोषसि मधुमत्पार्थिव
ं रजः ॥ मधुद्यौरस्तु नः पिता ॥ मधुमान्नो वनस्प
तिर्मधुमां२ अस्तु सूर्यः ॥ माध्वीर्गावो भवन्तु नः ॥
यइमं त्रिसुपर्णमयाचितं ब्राह्मणाय दद्यात् ॥ भ्रूणह
त्यां वा एते घ्नन्ति ॥ ये ब्राह्मणास्त्रिसुपर्णं पठन्ति ॥
ते सोमं प्राप्नुवन्ति ॥ आसहस्रात्पङ्क्तिं पुनन्ति ॥३९॥

॥ॐ॥ब्रह्म मेधवा॥मधु मेधवा॥ब्रह्ममेव मधुमे
धवा॥ब्रह्मा देवानां पदवीः कवीनामृषिर्विप्राणांम
हिषो मृगाणाम्॥श्येनो गृध्राणां स्वधितिर्वना
नां सोमः पवित्रमत्येति रेभन्॥हंसः शुचिषद्व
सुरन्तरिक्षसद्धोता वेदिषदतिथिर्दुरोणसत्॥नृ
षद्वरसदृतसद्व्योमसदब्जा गोजा ऋतजा अद्रिजा ऋ
तं बृहत्॥ऋचे त्वा ऋचे त्वा समित्स्रवन्ति सरितो न धे
नाः॥अन्तर्हृदा मनसा पूयमानाः॥घृतस्य धारा अ
भिचाकशीमि॥हिरण्ययो वेतसो मध्य आसाम्॥
तस्मिन्सुपर्णो मधुकृत्कुलायी भजन्नास्ते मधु
देवताभ्यः॥तस्यासते हरयः सप्त तीरे स्वधां दुहाना अ

ह.न[illegible]आराम् ॥ म इदं [illegible] सुपर्णि[illegible] ब्राह्म

णा यद धा[illegible] वीरहत्या वायुनेध्वनि ॥ ये ब्राह्मणा

३८ स्त्रि सुपर्णं पठन्ति ॥ ते सोमं प्राप्नुवन्ति ॥ आ सहस्रा ३८

त्पङ्क्तिं पुनन्ति ॥ ४० ॥ ॐ ॥ मेधा देवि जुषमाणा न

आगाद्विश्वाची भद्रा सुमनस्यमाना ॥ त्वया जुष्टा

नुदमाना दुरुक्तान्बृहद्वदेम विदथे सुवीराः ॥ त्व

या जुष्ट ऋषिर्भवति देवि त्वया ब्रह्मा गतश्रीरुत

त्वया ॥ त्वया जुष्टश्चित्रं विन्दते वसु सा नो जुषस्व

द्रविणेन मेधे ॥ ४१ ॥ मेधां म इन्द्रो ददातु मेधां दे

वी सरस्वती ॥ मेधां मे अश्विनावुभावाधत्तां पुष्कर

स्रजा ॥ अप्सरासु च या मेधा गन्धर्वेषु च यन्मनः ॥

दैवीमेधा सरस्वती सा मा मेधा सुरभिर्जुषताꣳ स्वाहा॥४२॥ आ मां मेधा सुरभिर्विश्वरूपा हिरण्यवर्णा

जगती जगम्या॥ ऊर्जस्वती पयसा पिन्वमाना सा

मां मेधा सुप्रतीका जुषन्ताम्॥४३॥ मयि मेधां मयि प्रजां मय्यग्निस्तेजो दधातु मयि मेधां मयि प्रजां

मयीन्द्र इन्द्रियं दधातु मयि मेधां मयि प्रजां मयि

सूर्यो भ्राजो दधातु॥४४॥ अपैतु मृत्युरमृतं न

आगन्वैवस्वतो नो अभयं कृणोतु [illegible] पर्णं

वनस्पतेरिवाभि नः शीयताꣳ रयिः सचतां नः

शचीपतिः॥४५॥ परं मृत्यो अनु परेहि पन्थां य

स्ते स्व [illegible] देवयानात्॥ चक्षुष्मते शृण्वते ते ब्रवीमि

धीभिर्मनः प्रजा[illegible]रीरि[illegible]मो नवीयान् ॥४६॥ [illegible]

प्राणां मनस[illegible]महे प्रजापतिं यो भुवनस्य गोपाः ॥

४० सनो मृत्योस्त्रायतां पात्वंहसो ज्योग्जीवा जराम शी ४०

महि ॥४७॥ अमुत्रभूयादध यद्यमस्य बृहस्पतेरभि

शस्तेरमुञ्चः ॥ प्रत्यौहतामश्विना मृत्युमस्मद्देवाना

मग्ने भिषजा शचीभिः ॥४८॥ हरिं हरन्तमनुयन्ति

देवा विश्वस्येशानं वृषभं मतीनाम् ॥ ब्रह्म सरूपम

नु मेदमागादयनं मा विवधी विक्रमस्व ॥४९॥ श्रान्तै

रग्निमिच्छानउभौ लोकौ सनेमहम् ॥ उभयोर्लोकयो

र्ऋध्वाति मृत्युं तराम्यहम् ॥५०॥ माच्छिदो मृत्यो माव

धीर्मा मे बलं विवृहो मा प्रमोषीः ॥ प्रजां मा मे रीरिष०

आयुरुग्रन्नचक्षसं,बाहुभिमा विधेम॥५१॥ मानोम
हान्तमुतमानो अर्भकं मान उक्षन्तमुत मान उक्षि

तम्॥ मानो वधीः पितरं मोत मातरं प्रिया मानस्त
नुवो रुद्ररीरिषः॥५२॥ मानस्तोके तनये मान आयु
षि मानो गोषु मानो अश्वेषु रीरिषः॥ वीरान्मानो
रुद्रभामितोऽवधीर्हविष्मन्तो नमसा विधेम॥५३॥
प्रजापते न,त्वदेतान्यन्यो विश्वा जातानि परि ता बभू
व॥ यत्कामास्ते जुहुमस्तन्नो अस्तु वयं स्याम पतयो
रयीणाम्॥५४॥ स्वस्तिदा विशस्पतिर्वृत्रहा विमृधो
वशी॥ वृषेन्द्रः पुर एतु नः स्वस्तिदा अभयङ्करः॥५५॥
त्र्यम्बकं यजामहे सुगन्धिं पुष्टिवर्धनम्॥ उर्वारुक

मिलेवघ्नानां सोमक्षीयमाम नाना ॥५६॥ येते स
हस्रमयुतं पाशा मृत्यो मर्त्याय हन्तवे ॥ तान्यज्ञस्य
मायया सर्वानवयजामहे ॥५७॥ मन्यवे स्वाहा म
न्यवे स्वाहा ॥५८॥ देवकृतस्यैनसो ऽवयजनमसि
स्वाहा ॥ मनुष्यकृतस्यैनसो ऽवयजनमसि स्वाहा ॥
पितृकृतस्यैनसो ऽवयजनमसि स्वाहा ॥ आत्मकृ
तस्यैनसो ऽवयजनमसि स्वाहा ॥ अन्यकृतस्यैनसो
ऽवयजनमसि स्वाहा ॥ अस्मत्कृतस्यैनसो ऽवय
जनमसि स्वाहा ॥ यद्दिवा च नक्तं चैनश्चकृम तस्या
वयजनमसि स्वाहा ॥ यत्स्वपन्तश्च जाग्रतश्चैनश्च
कृम तस्यावयजनमसि स्वाहा ॥ यत्सुषुप्तश्च जाग्र

तक्षेनक्ष्कृमतस्यावयजनमसिस्वाहा ॥ यद्धिद्वा
ᳫंसक्ष्काविद्वाᳫंसक्षेनक्ष्कृमतस्यावयजनमसि
४३ स्वाहा ॥ यानसमानसोऽवयजनमसिस्वाहा ॥ दूष्टी । ४३
यद्वोदेनाक्ष्कृमजिह्वयागुरुमनसोवाप्रयुनोदे
वहेडनम् ॥ अरावायोनो अभिदुच्छुनायते तस्मिन्त
देनोवसव्वोनिधेतनस्वाहा ॥ ६० ॥ कामोकार्षीन्नि
मोनमः ॥ कामोकार्षीत्कामः करोतिनाहंकरोमि
कामः कर्त्तानाहंकर्त्ता कामः कारयितानाहंकारयि
ता ॥ एषते कामकामायस्वाहा ॥ ६१ ॥ मन्युरकार्षी
न्नमोनमः ॥ मन्युरकार्षीन्मन्युः करोतिनाहंकरोमि
मन्युः कर्त्तानाहंकर्त्ता मन्युःकारयितानाहंकारयिता

४४

ाव ते मन्यो मन्यवे स्वाहा ॥६२॥ तिला अहोमिस्सरस
र्ष्ट सपिष्वोन्गधारे मम चित्ते रमन्तु स्वाहा ॥ गावो हिर
ण्यं धनमन्नपानं सर्वेषां ष्ट्रिये स्वाहा ॥ श्रियं च
लक्ष्मीं च पुष्टिं च कीर्तिं चानृण्यतामृ ॥ ब्रह्मण्यं ब
हुपुत्रतामृ श्रद्धामेधे प्रजाः संदधातु स्वाहा ॥६३॥
तिलाः कृष्णास्तिलाः श्वेतास्तिलाः सौम्या वशानु
गाः ॥ तिलाः पुनन्तु मे पापं यत्किंचिद् दुरितं मयि स्वा
हा ॥ चोरस्यान्नं नवश्राद्धं ब्रह्महा गुरुतल्पगः ॥ गो
स्तेयं सुरापानं भ्रूणहत्या तिलाः शांतिं शमय
न्तु स्वाहा ॥ श्रीश्च लक्ष्मीश्च पुष्टिश्च कीर्तिं चानृण्यतामृ ॥
ब्रह्मण्यं बहुपुत्रतामृ ॥ श्रद्धामेधे प्रजास्तु जातवेदः सं
ददातु स्वाहा ॥६४॥

प्राणापानव्यानोदानसमाना मे शुध्यन्तां ज्योतिरहं वि
रजा विपाप्मा भूयासं स्वाहा ॥ वाङ्मनश्चक्षुः
४५ श्रोत्रजिह्वाघ्राणरेतोबुद्ध्याकूतिः संकल्पा मे शु
ध्यन्तां ज्योतिरहं विरजा विपाप्मा भूयासं स्वाहा ॥
त्वक्चर्ममांसरुधिरमेदोमज्जास्नायवोऽस्थीनि
मे शुध्यन्तां ज्योतिरहं विरजा विपाप्मा भूयासं
स्वाहा ॥ शिरःपाणिपादःपार्श्वपृष्ठोरूदरजङ्घा
शिश्नोपस्थपायवो मे शुध्यन्तां ज्योतिरहं विर
जा विपाप्मा भूयासं स्वाहा ॥ उत्तिष्ठ पुरुष हरि
त पिङ्गल लोहिताक्ष देहि देहि ददापयिता मे शु
ध्यन्तां ज्योतिरहं विरजा विपाप्मा भूयासं स्वाहा ॥६५

पपिथ्व्यापस्तेजोवायुराकाशा मे शुध्यन्तां ज्योति
रहं विरजा विपाप्मा भूयासँ स्वाहा ॥ शब्दस्पर्श
४६ रूपरसगन्धा मे शुध्यन्तां ज्योतिरहं विरजा विपा ४६
प्मा भूयासँ स्वाहा ॥ मनो वाक्काय कर्माणि मे शु
ध्यन्तां ज्योतिरहं विरजा विपाप्मा भूयासँ स्वाहा
अव्यक्त भावैरहंकारैर्ज्योतिरहं विरजा विपाप्मा भू
यासँ स्वाहा ॥ आत्मा मे शुध्यन्तां ज्योतिरहं विरजा
विपाप्मा भूयासँ स्वाहा ॥ अन्तरात्मा मे शुध्यन्तां
ज्योतिरहं विरजा विपाप्मा भूयासँ स्वाहा ॥ परमा
४७ त्मा मे शुध्यन्तां ज्योतिरहं विरजा विपाप्मा भूयासँ ४७
स्वाहा ॥ क्षुधे स्वाहा ॥ क्षुत्पिपासाय स्वाहा ॥ विवि

क्लै स्वाहा॥ ऊं ग्विधानाय स्वाहा॥ कं क्षो॰काय स्वाहा
क्षुत्पिपासामलां ज्येष्ठामलक्ष्मीं नाशयाम्यहम्॥
४१ अभूतिमसमृद्धिं च सर्वां निर्णुद मे पाप्मानं स्वाहा ४१
अन्नमय प्राणमय मनोमय विज्ञानमय आनन्दमय
आत्मा मे शुध्यन्तां ज्योतिरहं विरजा विपाप्मा भूयास
स्वाहा॥ अग्नये स्वाहा॥ विश्वेभ्यो देवेभ्यः स्वाहा॥
ध्रुवाय भूमाय स्वाहा॥ ध्रुवक्षितये स्वाहा॥ अच्युत
क्षितये स्वाहा॥ अग्नये स्विष्टकृते स्वाहा॥ धर्माय स्वा
हा॥ अधर्माय स्वाहा॥ अद्भ्यः स्वाहा॥ ओषधिवनस्प
तिभ्यः स्वाहा॥१॥ रक्षोदेवजनेभ्यः स्वाहा॥ गृहाभ्यः
स्वाहा॥ अवसानेभ्यः स्वाहा॥ अवसानपतिभ्यः स्वाहा

सर्वेभ्यो भूतेभ्यः स्वाहा॥ कामाय स्वाहा॥ अन्तरिक्षाय स्वाहा
यदेजति जगति यच्च चेष्टति नाम्नो भागो यं नाम्ने स्वा
हा॥ पृथिव्यै स्वाहा॥ अन्तरिक्षाय स्वाहा॥ दिवे स्वाहा
सूर्याय स्वाहा॥ चंद्रमसे स्वाहा॥ नक्षत्रेभ्यः स्वाहा॥
इन्द्राय स्वाहा॥ बृहस्पतये स्वाहा॥ प्रजापतये स्वा
स्वा॥ ब्रह्मणे स्वाहा॥ स्वधापितृभ्यः स्वाहा॥ नमो
रुद्राय पशुपतये स्वाहा॥ ३॥ देवेभ्यः स्वाहा॥ पि
तृभ्यः स्वधास्तु॥ भूतेभ्यो नमः॥ मनुष्येभ्यो हन्त॥
प्रजापतये स्वाहा॥ परमेष्ठिने स्वाहा॥ यथाकूपः
शतधारः सहस्रधारो अक्षितः॥ एवा मे अस्तु
धान्यं सहस्रधारमक्षितम्॥ धनधान्यै स्वाहा॥

ये भूताः प्रचरन्ति दिवानक्तं बलिमिच्छन्तो वितुद
स्य प्रेष्याः॥ तेभ्यो बलिं पुष्टिकामो हरामि मयि पु
ष्टिं पुष्टिपतिर्दधातु स्वाहा॥६७॥ ओं तद्ब्रह्म॥ ओं
तद्वायुः॥ ओं तदात्मा॥ ओं तत्सत्यम्॥ ओं तत्सर्वम्॥
ओं तत्पुरोर्नमः॥ अन्तश्चरति भूतेषु गुहायां विश्व
मूर्तिषु॥ त्वं यज्ञस्त्वं वषट्कार स्त्वमिन्द्रस्त्वं रुद्र
स्त्वं विष्णुस्त्वं ब्रह्मत्वं प्रजापतिः॥ त्वं तदाप आपो ज्यो
ती रसोऽमृतं ब्रह्म भूर्भुवः सुवरोम्॥६८॥ श्रद्धा
यां प्राणेनिविष्टोऽमृतं जुहोमि श्रद्धायामपाने
निविष्टोऽमृतं जुहोमि श्रद्धायां व्यानेनिविष्टोऽमृ
तं जुहोमि श्रद्धायामुदानेनिविष्टोऽमृतं जुहोमि

शिवो मा विशाप्रदाहाय श्रद्धायां समाने निविष्टो
ऽमृतं जुहोमि ॥ ब्रह्मणि म आत्माऽमृतत्वाय अमृ

तोपस्तरणमसि ॥ श्रद्धायां प्राणे निविष्टोऽमृतं

५०

जुहोमि ॥ शिवो मा विशाप्रदाहाय ॥ प्राणाय स्वाहा ॥
श्रद्धायामपाने निविष्टोऽमृतं जुहोमि ॥ शिवो
मा विशाप्रदाहाय ॥ अपानाय स्वाहा ॥ श्रद्धायां
व्याने निविष्टोऽमृतं जुहोमि शिवो मा विशा
प्रदाहाय ॥ व्यानाय स्वाहा ॥ श्रद्धायामुदाने नि
विष्टोऽमृतं जुहोमि ॥ शिवो मा विशाप्रदाहाय
उदानाय स्वाहा ॥ श्रद्धायां समाने निविष्टोऽमृ
तं जुहोमि ॥ शिवो मा विशाप्रदाहाय समानाय स्वाहा ॥

न्ब्रह्मणि म आत्माऽमृतत्वाय॥ अमृतापिधानमसि॥ ६९॥
श्रद्धायां प्राणे निविश्यामृतं हुतम्॥ प्राणमन्ने
नाप्यायस्व॥ श्रद्धायामपाने निविश्यामृतं हुतम्॥
अपानमन्नेनाप्यायस्व॥ श्रद्धायां व्याने निविश्यामृ
तं हुतम्॥ व्यानमन्नेनाप्यायस्व॥ श्रद्धायामुदाने
निविश्यामृतं हुतम्॥ उदानमन्नेनाप्यायस्व॥
श्रद्धायां समाने निविश्यामृतं हुतम्॥ समान
मन्नेनाप्यायस्व॥ ७०॥ अङ्गुष्ठमात्रः पुरुषोऽङ्गुष्ठं च
समाश्रितः॥ ईशः सर्वस्य जगतः प्रभुः प्रीणाति
विश्वभुक्॥ ७१॥ वाङ्म आसन्॥ नसोः प्राणः॥
अक्ष्णोश्चक्षुः॥ कर्णयोः श्रोत्रम्॥ बाह्वोर्बलम्॥

उक्नोरोज: ॥ अरिवानिध्यानर्क्रानितनू: ॥ तनु
वामे सहनमसे अस्तु मामाहि ध्वसी: ॥१२॥ वय:
सुपर्णा उपसेदुरिन्द्रं प्रियमेधा ऋषयो नाधमा
ना: ॥ अपध्वान्तमूर्णुहि पूर्धि चक्षुर्मुमुग्ध्यस्मा
न्निधयेव बद्धान् ॥१३॥ प्राणानां ग्रन्थिरसि रुद्रो मा
विशान्तक: ॥ तेनान्नेनाप्यायस्व ॥१४॥ नमो रुद्राय
विष्णवे मृत्युर्मे पाहि ॥१५॥ त्वमग्ने द्युभिस्त्वमाशु
शुक्षणिस्त्वमद्भ्यस्त्वमश्मनस्परि ॥ त्वं वनेभ्यस्त्व
मोषधीभ्यस्त्वं नृणां नृपते जायसे शुचि: ॥१६॥
शिवेन मे संतिष्ठस्व ब्रह्मवर्चसेन मे संतिष्ठस्व यज्ञ
स्यर्द्धिमनु संतिष्ठस्वोपते यज्ञ नम उपते नम उ
पते नम: ॥१७॥

सत्यं परं परꣳ सत्यꣳ सत्येन न सुवर्गाल्लोकाच्च्यवन्ते
कदाचन सताꣳ हि सत्यं तस्मात्सत्ये रमन्ते तप इति त
पो नानशनात्परं यद्धि परं तपस्तद्दुर्धर्षं तद्दुराधर्षं
तस्मात्तपसि रमन्ते दम इति नियतं ब्रह्मचारिणस्त
स्माद्दमे रमन्ते शम इत्यरण्ये मुनयस्तस्माच्छमे रमन्ते
दानमिति सर्वाणि भूतानि प्रशꣳसन्ति दानान्ना
तिदुष्करं तस्माद्दाने रमन्ते धर्म इति धर्मेण सर्वमि
दं परिगृहीतं धर्मान्नातिदुष्करं तस्माद्धर्मे रमन्ते प्र
जन इति भूयाꣳसस्तस्माद्भूयिष्ठाः प्रजायन्ते तस्मा
द्भूयिष्ठाः प्रजनने रमन्तेऽग्नय इत्याह तस्मादग्नय
आधातव्या अग्निहोत्रमित्याह तस्मादग्निहोत्रे रमन्ते

यज्ञ इति यज्ञो हि देवानां तस्माद्यज्ञे रमन्ते मानसमिति
विद्वांसस्तस्माद्विद्वांस एव मानसे रमन्ते न्यास
इति ब्रह्मा ब्रह्मा हि परः परो हि ब्रह्मा तानि वा एता
न्यवराणि परांसि न्यास एवात्यरेचयद्य एवं वेद
इत्युपनिषत् ॥१८॥ प्राजापत्यो हारुणिः सुपर्णेयः प्र
जापतिं पितरमुपससार किं भगवन्तः परमं वदन्ती
ति तस्मै प्रोवाच सत्येन वायुरावाति सत्येनादित्यो
रोचते दिवि सत्यं वाचः प्रतिष्ठा सत्ये सर्वं प्रतिष्ठि
तं तस्मात्सत्यं परमं वदन्ति तपसा देवा देवतामग्र
आयन् तपसर्षयः सुवरन्वविन्दन् तपसा सप
त्नान् प्रणुदामारातीस्तपसि सर्वं प्रतिष्ठितं तस्मा

५८

५५

तप परमं वदन्ति दमेन दान्ताः किल्बिषमवधून्व
न्ति दमेन ब्रह्मचारिणः सुवरगछन् दमो भूतानां
दुराधर्षं दमे सर्वं प्रतिष्ठितं । तस्माद्दमः परमं वदन्ति
शमेन शान्ताः शिवमाचरन्ति शमेन नाकं मुनयो
ऽन्वविन्दञ्छमो भूतानां दुराधर्षं शमे सर्वं प्रति
ष्ठितं तस्माछमः परमं वदन्ति दानं यज्ञानां वरूथं
दक्षिणा लोके दातारं सर्वभूतान्युपजीवन्ति
दानेनारातीरपानुदन्त दानेन द्विषन्तो मित्रा भव
न्ति दाने सर्वं प्रतिष्ठितं तस्माद्दानं परमं वदन्ति ध
र्मो विश्वस्य जगतः प्रतिष्ठा लोके धर्मिष्ठं प्रजा
उपसर्पन्ति धर्मेण पापमपनुदन्ति धर्मे सर्वं प्र

५५

तिष्ठितं तस्माद्धर्मं परमं वदन्ति प्रजननं वै प्रतिष्ठा
लोके साधु प्रजायास्तन्तुं तन्वानः पितृणामनृणो
भवति तदेव तस्या अनृणं तस्मात्प्रजननं परमं व
दन्त्यग्नयो वै त्रयी विद्या देवयानः पन्था गार्हपत्य ऋ
क्पृथिवी रथन्तरमन्वाहार्यपचनं यजुरन्तरिक्षं वाम
देव्यमाहवनीयः साम सुवर्गो लोको बृहत्तस्मादग्नीन्
परमं वदन्त्यग्निहोत्रं सायं प्रातर्गृहाणां निष्कृतिः
स्विष्टं सुहुतं यज्ञक्रतूनां प्रायणं सुवर्गस्य लो
कस्य ज्योतिस्तस्मादग्निहोत्रं परमं वदन्ति यज्ञ
इति यज्ञेन हि देवा दिवं गता यज्ञेनासुरानपानुद
न्त यज्ञेन द्विषन्तो मित्रा भवन्ति यज्ञे सर्वं प्रतिष्ठितं

तस्माद्यज्ञं परमं वदन्ति मानसं वै प्राजाप.त्यं प
वित्रं मानसेन मनसा साधु पश्यति मानसा ऋ
षयः प्रजा असृजन्त मानसे सर्वं प्रतिष्ठितं तस्मा
न्मानसं परमं वदन्ति न्यास इत्याहुर्मनीषिणो ब्रह्मा
णं ब्रह्मा विश्वः कतमः स्वयंभूः प्रजापतिः संवत्सर
इति संवत्सरोऽसावादित्यो य एष आदित्ये पुरुषः
स परमेष्ठी ब्रह्मात्मा याभिरादित्यस्तपति रश्मिभि
स्ताभिः पर्जन्यो वर्षति पर्जन्येनौषधिवनस्पतयः
प्रजायन्त ओषधिवनस्पतिभिरन्नं भवत्यन्नेन प्रा
णाः प्राणैर्बलं बलेन तपस्तपसा श्रद्धा श्रद्धया मे
धा मेधया मनीषा मनीषया मनो मनसा शान्तिः

प्रणत्या चित्तं चित्तेन स्मृतिः स्मृत्या स्मारं स्मारेण विज्ञा
नेन वै इमानि नाम्मान वेदयन्ति तस्मादन्नं ददन्सर्वाण्ये
तानि ददत्यन्नात्प्राणा भवन्ति भूतानां प्राणैर्मनो मन
सश्च विज्ञानं विज्ञानादानन्दो ब्रह्मयोनिः स वा एष
पुरुषः पञ्चधा पञ्चात्मा येन सर्वमिदं प्रोतं पृथिवी
चान्तरिक्षं च द्यौश्च दिशश्चावान्तरदिशश्च स वै
सर्वमिदं जगत्स स भूतं स भव्यं जिज्ञासक्लृप्तज
ऋतजा रयिष्ठाः श्रद्धा सत्यो महस्वान्तपसो वरिष्ठाज्ज्ञा
त्वा तमेवं मनसा हृदा च भूयो न मृत्युमुपयाति
विद्वान् तस्मान्न्यासमेषां तपसामतिरिक्तमाहुर्व
सुरण्वो विभूरसि प्राणे त्वमसि संधाता ब्रह्मन्

त्वमसि विश्वधृत्तेजोदास्त्वमस्यग्निरसि वर्चोदास्त्वमसि
सूर्यस्य द्युम्नोदास्त्वमसि चंद्रमस उपयामगृहीतोऽसि
५९ ब्रह्मणे त्वा महस ओमित्यात्मानं युंजीतैतद्वै महोपनिष ५९
दं देवानां गुह्यं य एवं वेद ब्रह्मणो महिमानमाप्नोति
तस्माद्ब्रह्मणो महिमानमित्युपनिषत् ॥७९॥
तस्यैवं विदुषो यज्ञस्यात्मा यजमानः श्रद्धा पत्नी शरी
रमिध्ममुरो वेदिर्लोमानि बर्हिर्वेदः शिखा हृदयं यूपः
काम आज्यं मन्युः पशुस्तपोऽग्निर्दमः शमयिता दक्षिणा
वाग्घोता प्राण उद्गाता चक्षुरध्वर्युर्मनो ब्रह्मा श्रोत्र
मग्नीद्यावद्ध्रियते सा दीक्षा यदश्नाति तद्धविर्यत्पि
बति तदस्य सोमपानं यद्रमते तदुपसदो यत्संचरत्यु

पविप्रानुत्तिवत्तेच समप्रवगयौ पन्नुमुयंतदाहवनीयो
पाव्याहूति राहु निपदस्य विशानंतजुहोति ॥ पत्सायं
प्रातरंति तत्समिधं पक्षातमेधं दिनरं सायंचता
नि सव्वनानि पे अहोराजेते दक्षी पूर्णमासो पेऽर्धमा
सो ऋतवे चातुर्मास्यानि पजातवत्त पक्षुवध्याये संव
त्सराप्त परिवत्सराक्ष तेऽहर्गणाः सर्ववेद संवारा
तत्सजं पन्मरणांतदनभयराततद्वै जरामर्यमग्निहोत्रं
सजं परावं विद्वानुदगयने प्रमीयते देवानामेव म
हिमानं गत्वादित्यस्य सायुज्यं गच्छत्यथयो दक्षिणे
प्रमीयते पितृणामेव महिमानं गत्वा चंद्रमसः सा
युज्यं सलोकतामाप्नोत्येतौ वै सूर्याचंद्रमसोर्महि

मानो ब्राह्मणो विद्वानभिजयति तस्माद् ब्रह्मणो महिमानमा

प्नोति तस्माद् ब्रह्मणो महिमानम् ॥ सह नाववत्विति

शान्तिः इति नारायणोपनिषत्समाप्ता २६ ॥